विषय-सूची



स्व० माता चन्द्रवती जी अपने पति स्व० पं० इन्द्र विद्यावाचस्पति के साथ

मैं क्षमा मांगने आई हूँ !

(श्रीमती चन्द्रावती आदरणीया माता जी द्वारा स्वर्गीय श्री पं० इन्द्र जी विद्यावाचस्पति के प्रति लिखी गई कविता जो उनके कफन के साथ प्राप्त हुई । —श्री धर्मवीर ।)

भक्ति सुमन ले मन-मन्दिर में, पूजा करने आई हूं !
श्रद्धा भक्ति के पुष्पों की मैं, झोली भरकर लाई हूं ।।
पावन चरणों में शीष झुका, भेंट चढ़ाने आई हूं ।
तुमको प्रतिक्षण मन में पाऊं, यह वर लेने आई हूं ।।
इस जीवन के तुम साथी थे, तुम बिछुड़ गये मैं जीती हूं ।
पानी बिन मीन जिये जैसे, वैसे ही अब मैं जीती हूं ।।
इस जग के प्राणी कहते हैं, तुम सुख निद्रा में सोये हो ।
तुम जग न उठो व्याकुल होकर, मैं धीरे २ रोती हूं ।।
करुणा के तुम सागर थे, निराश्रितों के तुम आश्रय थे ।
मुझ दु:खिया पर करुणा करके, फिर से आश्रय दो निज चरणों में ।।
विश्वास भरी आशा लेकर, मैं बिनती करने आई हूं ।
बन सकी न कुछ सेवा मुझसे, मैं क्षमा मांगने आई हूं ।।

श्रद्धाञ्जलि

श्री भीमसेन जी आर्य चाकरकर महाराष्ट्र

मैंने अपने जीवन में है मातृ-हृदय को फिर से पाया ।
कैसे संभव है माता का स्नेहामृत भी जाय भुलाया ।।
सेवा की हो मूर्तरूप मां मन-मन्दिर के आसन पर ।
भूलों को मेरी क्षमा करो मां हूं चन्द्र-लोक से दूर कहीं पर ।।
लूंगा तब आशीस शीस पर सत्पथ को त्यागूं न कदा ।
गाऊं गुण मैं नित्य ईश के सेवा-व्रत आचरूं सदा ।।

० ० ० ०

चंदन सी सुखदाई माता द्रव्य स्नेह का निर्मल सोला ।
वह मस्त सदा सेवा में रहती तीर्थ बनी दुख-दीनन बहती ।।
मा क्यों कर प्रभु ने तुम्हे बुलाया तात ने कहो क्यों हमें रुलाया ।
जा प्रभु से मिल शांति पान कर ओ ईश हमें भी धैर्य दानकर ।।

शोक-समाचार

गुरुकुल प्रेमी सज्जनों तथा आर्य जगत् के लिये यह बड़े दुःख का समाचार है कि स्व० श्री पं० इन्द्र विद्यावाचस्पति की धर्म परायणा पतिव्रता धर्मपत्नी श्रीमती चन्द्रावती जी का दिनांक २६ अप्रैल १९७३ की रात्रि १२ बजकर २० मिनट पर गुरुकुल भूमि की अपनी वाटिका में स्वर्गवास हो गया। जब तक श्री पं० इन्द्र विद्यावाचस्पति जीवित रहे तब तक अपने शरीर सुख की परवाह किये बिना रात दिन उनकी सेवा में तत्पर रहीं, छाया की तरह सदा उनका अनुगमन किया। पं० जी की मृत्यु के पश्चात् भगवान तथा उनके नाम की माला जपती रहीं। उनका अतिथि सत्कार सभी गृहस्थ जनों के लिये अनुकरणीय था। ऐसी पतिव्रता साध्वी विदुषी स्त्री के देहावसान का समाचार सभी गुरुकुल प्रेमी जनों तथा सम्बन्धियों के लिये बहुत दुःखप्रद है। भगवान् ऐसी दिव्य आत्मा को सद्गति तथा कुटुम्बी जनों को शान्ति व सान्त्वना प्रदान करे। यही हमारी परम प्रभु से प्रार्थना है।

— सम्पादक

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

वैशाखः, २०३०, मई १९७३, वर्षम्-२५, अङ्कः ९ पूर्णाङ्क २९३

श्रुति सुधा

हंसैरिव सखिभि र्वावदद्भिरश्मन्मयानि नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वां अगायत् ॥

ऋ. १०।६७।३

(वावदद्भि.) निरन्तर स्तुति करने वाले (हंसैः इव सखिभिः) हंसों के समान श्वास प्रश्वास रूपी मित्र मरुतों से (अश्मन्मयानि) पत्थर समान कठोर (नहना) बन्धनों को (व्यस्यन्) शिथिल करता हुआ वह (विद्वान्) विद्वान् बृहस्पति (गाअभि कनिक्रदत्) गौओं अर्थात् दिव्यशक्तियों की ओर क्रन्दन करता है (उत) और (प्रास्तौत्) उनकी स्तुति करता है, (उत् अगायत्) ऊपर की ओर ऊंचा गान करता है ।

नोट:—श्वास प्रश्वास पर हंस ध्वनि—उच्छ्वासे चैव निःश्वासे हंस इत्यक्षरद्वयम् ।

अर्थात्:—इन श्वास प्रश्वासों का वह बृहस्पति निरन्तर सेवन करता है इस कारण वह परम हंस योगी हैं ।

अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥

ऋ १०।६७।४

(द्वाभ्यां अवः) दो से इधर और (एकया परः) एक से परे (अनृतस्य सेतौ गहा) अनृत के बांध में एक गुहा है । जहां (गाः तिष्ठन्तीः) गौएं ठहरी हुई हैं बृहस्पति (तमसि) उस अन्धेरी गुफा में (ज्योतिः इच्छन्) प्रकाश चाहता हुआ (उस्राः) उन गौरूपी किरणों को (उत् आकः) ऊपर निकालता है और (तिस्रः) तीनों गौओं (किरणों-वाणियों) को (वि आवः) आवरण रहित कर देता है अर्थात् खोल देता है ।

वाणी के चार रूप हैं, वैखरी, मध्यमा, परा पश्यन्ती । इन चारों वाणियों में दो (परा पश्यन्ती) में इधर और एक (वैखरी) से परे जो मध्यमा वाक् है वहां अनृत का बांध है और उस बांध से दिव्य किरणें रुकी हुई है । बृहस्पति उन किरणों को दिव्य ज्योति को ऊपर बाहिर की ओर निकालता है ।

वैदिक-साहित्य-सौदामिनी

श्री वागीश्वरो विद्यालंकारः साहित्याचार्यः

जीवनयज्ञं निर्वर्तयन्ति । अथवा पुरुषो वाव यज्ञः१ इति छान्दोग्योपनिषदाह–(३-१६-१) षोडशाधिकवर्षशतव्यापि मानवजीवनमेव दैवयज्ञस्तं क्रमशो वसुरुद्रादित्यरूपेणावस्थिताः प्राणा एवाहरन्ति । कर्मयोगिनः पुनस्त्यक्तफलाभिलाषाः कर्त्तव्यभावनया यत् कर्म समाचरन्ति तदपि यज्ञपदाभिधेयम् । 'एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।' भग. गीता ४-३२ । एते यज्ञा एव प्रथमानि धर्माणि मानवस्य प्रधानानि कर्तव्यानि । प्रथममितिपदमिह न कालप्राथम्यवाचकम् प्रत्युत गुणैः कर्मभिर्वा श्रेष्ठस्य वाचकम् । 'प्रथमः स्यात् प्रधानाद्योः ।' इति अनेकार्थसंग्रहे हेमः । धर्मश्च धारणात्'धारणाद् धर्ममित्याहुः' इति मनुः । ये देवाः पूर्वोक्तानां यज्ञानामन्यतमं समाचरन्ति ते महिमानः=महिमवन्तः । नाकं सचन्ते=स्वर्गलोकं प्राप्नुवन्ति । महिमपदमिह महिमवन्तं लक्षयति । महिमातिशयव्यंजनं प्रयोजनम् । कम्=सुखम् । तत्प्रतिषेधोऽकम् । न अकं=दुःखं यत्र स नाकः । सुखिजीवनम्, सुखी परिवारः, सुखीसमाजो वा । तं नाकमेव विवृणोति यत्र नाके पूर्वे—पुण्यवतां प्रथमे श्रेष्ठा इत्यर्थः । साध्याः=साधनापूतान्तकरणाः सन्ति निवसन्ति । यथा यागेष्वग्नौ हविरर्प्यते तथाऽत्रोक्तेषु आत्मयज्ञादिष्वपि अहं भावस्य इन्द्रियाणाम्, विषयरसानां वा त्यागः क्रियते अतः प्रदानसाधर्म्येणैषां यज्ञत्वम् । तेनात्र गौणीलक्षणा । एवम् लौकिकसाहित्येऽपि वेणीसंहारे—

चत्वारोवयमृत्विजः स भगवान् कर्मोपदेष्टा हरिः
संग्रामाध्वरदीक्षितो नरपतिः पत्नी गृहीतव्रता ।
कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलं
राजन्योपनिमन्त्रणाय रसति स्फीतं यशोदुन्दुभिः ॥

अत्र संग्रामे तदङ्गेषु पाण्डवादिषु यज्ञतदङ्गत्वाद्यारोपात् साङ्गं रूपकम् । सारोपा गौणीलक्षणा अस्य रूपकस्य मूलम् इति साहित्यदर्पणादौ स्पष्टम् ।

तथैवाध्वरपदमपि व्युत्पत्या हिंसारहितसर्वानुष्ठानवाचकमपि रूढ्या यागमात्रवाचकम् । किन्तु—

---

१ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥
दैवमेवाऽपरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोप जुह्वति ॥२५॥
श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्ये इन्द्रियाग्निषु जुह्वति ।२६
सर्वाणीन्द्रियकर्माणिप्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ।२७
अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।२९

अत्र—ब्रह्माग्नौ, संयमाग्नौ, इन्द्रियाग्निषु—इत्यादि गीतावचनेषु सर्वत्र सारोपा गौणी लक्षणा । मनुस्तु—

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः ।
पंच क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

मनु. ३।६९,७० ।

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।
स इद्देवेषु गच्छति ।। ऋ १।१।४ ।

देवता=अग्निः । ऋषिः-मधुच्छन्दा वैश्वामित्रः । छन्दः=गायत्री । अत्र यज्ञाध्वरपदयोरुभयोर्यागार्थकत्वे पुनरुक्तिः । अभिधयाऽन्यतरस्य यौगिकार्थपरिग्रहे च योगाद् रूढिर्बलीयसीति सिद्धान्तव्याकोपः । तत्का गतिरितिचेत्-

गीष्पतिरप्याङ्गिरसो गदितुं ते गुणगणान् सगर्वो न ।
इन्द्रः सहस्रनयनोऽप्यद्भुतरूपं परिच्छेत्तुम् ।।

इह यथा 'लक्षणायां (स्वीकृतायां) योगरूढेन गीष्पतिरितिपदेन (गिरां पतिरिति) योगार्थमात्रप्रतिपादने न किंचिद् बाधकम् ।' (इति रसगङ्गाधरे श्रीजगन्नाथाः) तथा योगरूढेनाध्वरपदेनाऽपि हिंसारहित इति योगार्थमात्रपरिग्रहे न काचित् क्षतिः । ततः एकेनैव यज्ञपदेन कृतार्थतायां पुनर्यज्ञपर्यायाध्वरपदपुनरुक्तौ केनाऽपि प्रयोजनेन भवितव्यमिति जिज्ञासायाम् 'गीष्पतिरि'त्यादौ यथा राज्ञोऽलौकिकगुणरूपयोः कश्चिदतिशयो व्यज्यते तथा ऽत्रापि यज्ञस्य सर्वथा हिंसाराहित्यप्रतिपादनं प्रयोजनमिति प्रतीतिर्जायते । न तु योगरूढेनाऽध्वरपदेन प्राग् एकपदवाच्यत्वसम्बन्धाद् हिंसारहितत्वाऽभिन्नयागार्थबोधः । ततश्च तेन सामानाधिकरण्यसम्बन्धात् (एकविभक्त्यन्तत्वात्) यज्ञपदेनाऽभेदसंसर्गे हिंसारहितयज्ञाऽभिन्नयज्ञ इति बोधः । प्रक्रियायामस्यां वृथागौरवादनुभवविरोधाच्च । तस्मादत्रलक्षणामूलस्य अविवक्षितवाच्यध्वनेरर्थान्तरसंक्रमितवाच्यो नामभेदोऽभ्युपेयः । इहाध्वरपदं स्वकीय एव नितरां हिंसारहिताध्वररूपेऽर्थेसंक्रमितम् । श्रीमतामरविन्दचरणानामभिप्रायमनुसरन् श्रीकपालिशास्त्रिमहोदयस्तु मन्त्रमिममन्यथा व्याख्याति । तथाहि-अग्ने=साधनाऽध्वनि साधकानग्रे नयतीति तत्सम्बुद्धिपदमिदम् । अध्वानं=परमपदप्राप्तेर्मार्गं साधकाय राति ददातीत्यध्वरः । तथ विधं य यज्ञं हे अग्रेनेतः त्वं सर्वतः परिवृत्य तिष्ठसि स ज्ञानयज्ञ एव देवेषु गच्छति । तेनैव साधकः स्वात्मानं विन्दतीति । देवाः दिव्याः शक्तयः प्रवृत्तयो वा । अत्रापि यज्ञाध्वरपदयोर्योगरूढयोरर्थबोधप्रकारः पूर्ववदेव ।

त्रातारमिन्द्रमवितारमिन्द्र
हवे हवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं
स्वस्ति नो मघवा धात्विन्द्रः ।।

ऋ. ४।४७।११

एतादृशेषु समानार्थकाऽनेकयोगरूढपदप्रयोगस्थलेषु प्रायः सर्वत्रेयमेवाऽर्थाविबोधसरणिरनुसरणीया । मन्त्रेऽस्मिन् इन्द्रशक्रपुरुहूतमघवत्पदानां सह प्रयोगादाभासमाना पुनरुक्तिस्तेषां यौगिकार्थेन प्रतिषिध्यते तस्मात् पुनरुक्तवदाभासोऽलङ्कारः ।

नन्वेवं पूर्वोदाहृतेषु समानार्थकानाम् असमानव्युत्पत्तीनां योगरूढपदानां सह प्रयोगस्थलेषु अन्यतमस्य यौगिकार्थस्वीकारेण भवतु समाधानम्--

सोमं मन्यते पपिवान् यत् सं पिशन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ।।

ऋ. १०।८५।३

ईदृशेषु असमानार्थकानाम् समानाकृतीनां रूढानां पदानां सह प्रयोगे का गतिरिति चेत् ? तत्र श्लेषः शरणम् । इह प्रथमं सोमपदमौषधविशेषार्थं द्वितीयं च चन्द्रार्थं रूढम् । तदुक्तम् नानार्थसंग्रहे''सोमस्तु हिमदीधितौ । वानरे च कुबेरे च पितृदेवे समीरणे । वसुप्रभेदे कर्पूरे नीरे सोमलतौषधाविति ।

पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतंगहनम् ।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ।

ईदृशलौकिकसंस्कृतसाहित्योदाहरणेष्वपि श्लेष

त्र ।

सकृत्प्रयुक्तमेकमेव पदं यत्रानेकार्थवाचकं तत्रापि श्लेष इत्युदाहरति—

शं नो देवीरभिष्टय आपो भवन्तु पीतये ।
शं योरभि स्रवन्तु नः ॥ ऋ. १०।९।४

देवता आपः । ऋषिः—त्वष्टपुत्रस्त्रिशिराः । छन्दः—गायत्री । देवीः आपः दिव्या आपः । नः= अस्माकं सन्तापापनोदद्वारेण । शं भवन्तु=सुखाः सन्तु । अभिष्टये=अस्माकं यज्ञादिसंपादनाय अभिमतसाधनाय वा भवन्तु । ता नः पीतये= पानाय तृप्तये वा भवन्तु । तथा च नः शं भवन्तु= उत्पन्नानां रोगादीनां शमनकारिण्यो भवन्तु । योः भवन्तु=यावनाय=अनुत्पन्नानां कष्टानां भाविनामित्यर्थः प्रागेव दूरीकरणाय च भवन्तु । नः अभि स्रवन्तु=अस्मान् अभिलक्ष्य सर्वतः सुखवृष्टिमिव कुर्वन्तु । ब्रह्मयज्ञे सन्ध्योपासनकर्मणि विनियुक्तं मन्त्रमिमं पठन् उपासकस्त्रिराचामति । आचमनाङ्गभूतत्वादिह 'आपः' पदं जलार्थकम् । किन्तु मन्त्रस्यास्य ब्रह्मयज्ञे विनियोगात् परमात्मदेवताकत्वाच्च तदेवापः पदं परमात्मार्थकम् । तदुक्तं यजुर्वेदे—तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः । तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः ॥ यजु. ३२।१ । देवताः=परमात्मा । ऋषिः=स्वयम्भु ब्रह्म । छन्दः=अनुष्टुप् । एवमुभयोरर्थयोः प्रासङ्गिकत्वात्पदमिदमुभयार्थकम् । तेनात्र श्लेषः । यथा—सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः । नयोपकारसांमुख्यमायासि तनु वर्तनम् । सा.हि.द. १०।११ । राजपुरुषैर्निगृहीतस्य चौरस्य शिवं प्रति तदैव संमुखागतं स्वपुत्रं प्रति च वचनमिदम् । जलार्थकेषु परमात्मार्थकेषु च पृथक् पृथक् पदेष्वनेकेषु सत्स्वपि 'आपः' इत्येकपदप्रयोगे किं प्रयोजनमिति चेत् यथा शीतलानि जलानि शरीरमभिव्याप्य तत्रत्यं सकलसन्तापं शमयन्ति तथा आपोरूपः स भगवान् नो बाह्यमाभ्यन्तरं च सर्वं सन्तापं शमयतीत्यापःपदेन व्यज्यते । अत एव कश्चिदाह—

निराकारं भजन्त्येके नराकारमथाऽपरे ।
वयं संतापसंतप्ता नीराकारं भजामहे ॥

इह आपः पदं जलार्थे रूढम् । आपः स्त्रीभूम्नि वा वारि सलिलं कमलं जलम् । इत्यमरः । भगवदर्थे तु व्याप्नोते यौगिकम् । अत्र परिकराङ्कुरालंकारः—'साभिप्राये विशेष्ये तु, भवेत् परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दातादेवश्चतुर्भुजः । इति । कुवलयानन्दः ॥'

नाम रामइति तुल्यमात्मजे
वर्तमानमहिते च दारुणे ।
हृद्यमस्य भयदायि चाऽभव-
द्रत्नजातमिव हारसर्पयोः ॥

रघुवंश. ११।६८ ।

अत्रापि रामपदं प्रकरणप्राप्तयो राघवजामदग्न्ययो रुभयोर्वाचकम् तेनात्र श्लेषः । यत्र त्वन्यत्र कृतसंकेतैश्चन्द्रनेत्ररामादिभिः स्वस्वार्थेषु रूढैः पदैरेकद्वित्रिप्रभृतयः संख्याः सूच्यन्ते तत्र लक्षणैव न श्लेषः । तादृशस्थलेषु रामादिभिः पदैः प्रथमं स्वमुख्यार्थानां राघवादीनाम् अभिधयोपस्थितिः । ततस्तदबाधे राघवादिव्यक्तित्रयगोचरत्रित्वस्य प्रतीतिः । इह रामपदेन त्रित्वावगमे तत्पदाभिधेयव्यक्तीनां प्रसिद्धं त्रित्वमेव हेतुः । रामादिभिः पदैस्त्रित्वादिबोधने तादृशं किञ्चित्प्रयोजनं नास्ति यदर्थं गङ्गायां घोषः इत्यादिषु स्थलेषु प्रयोजनवती लक्षणाश्रीयते ।

अथ चतुर्थः पदभेदो यौगिकरूढाख्यः—

समुदायस्य शक्त्यैकोऽवयवानां तथा परः ।
यत्रार्थो बोध्यते तत्तु पदं यौगिकरूढकम् ॥९९॥
प्रकृतिप्रत्ययादीनां शक्त्योद्भेदकृदर्थकम् ।
पदमुद्भिद् यथा रूढ्या यागभेदस्य वाचकम् ॥१००

उत्पूर्वकाद् भिदेः क्विपि निष्पन्नम् उद्भित्पदम् अवयवानां शक्त्या ऊर्ध्वभेदन कर्तॄणामङ्कुरादीनां बोधकम् । ते हि भुवमुद्भिद्योत्पद्यन्ते । तदुक्तम् उद्भिदस्तरुगुल्माद्याः । इत्यमरः । तदेव रूढ्या यागविशेषस्य वाचकम् । 'उद्भिदा यजेत' इत्यादिना विषयोऽयं मीमांसायाः प्रथमाध्यायस्य चतुर्थ पादे निरूपितः । एवम् निशान्तपञ्चाननाश्वगन्धादिपदैरपि केवलावयवानां शक्त्या क्रमशो रात्र्यवसानपञ्चसंख्यकमुखवद् व्यक्तिवाजिगन्धयुक्तमन्दुरादयः केवलसमुदायशक्त्या च भवन-सिंह-भेषज-विशेषादयो रूढार्था बोध्यन्ते । तदुक्तं रसगङ्गाधरे "अन्ये तु अश्वकर्णादिशब्देषु न अभिधायाः प्रथमद्वितीययो विधयोः (यौगिकस्य रूढेश्च) प्रसक्तिः कैवल्यविरहात् परन्तु सङ्करस्य द्वौभेदौ योगरूढि र्यौगिकरूढिश्चेति । तत्राद्यस्योदाहरणं पंकजादिशब्दाः द्वितीयस्याश्वकर्णादयः इत्याहुः चतुर्थ एवाऽयमभिधाया भेदः (यौगिकरूढिः) इत्यन्ये ।' यथा—

द्राग्वारुणीभजननिह्नुतराजतेजो,
निष्क्रान्ततारमुपशान्ततमोविकारम् ।
पूर्वाशयाविशति सत्पथभाजि मित्रे,
सत्यं निशान्तसमयस्य निशान्तमासीत् ॥

चम्पूरामायणे सुन्दरकाण्डे

अत्र प्रथमं निशान्तपदमवयवानां शक्त्या निशावसानवोधकं द्वितीयं तु रूढ्या भवनवाचकम् । एवम्—

आ नोभद्राः क्रतवो यन्तु विश्वतो-
ऽदब्धासो अपरीतास उद्भिदः ।
दवा नो यथा सदमिद् वृधे अस-
न्नप्रायुवो रक्षितारो दिवे दिवे ॥

ऋ. १ । ८९ । १

देवता=विश्वेदेवाः । ऋषिः=गोतमो राहूगणः । छन्दः जगती ।

भद्राः = कल्याणकारिणः । क्रतवः = दृढसंकल्पाः । अदब्धासः=असुरैरहिंसिताः । अपरीतासः=अ+परि+इण्गतौ+क्तप्रत्यये रूपम् । शत्रुभिरप्रतिरुद्धागमनाः । उद्भिदः=सत्कर्मसु विघ्नोत्पादकानाम् उद्भेदनकर्तारः । अथवा यथा बीजाङ्कुरा जातमात्रा अपि भुवःपृष्ठमुद्भिद्य उत्तिष्ठन्ति तथा विघ्नान् विनिवार्य सर्वदाऽभ्युत्थानशीलाः । अप्रायुवः=अप्रमाद्यन्तः सततजागरूका इत्यर्थः । रक्षितारश्च देवाः दिव्यगुणयुक्ताः सत्पुरुषाः । सदमित्=सदैव । दिवे दिवे=प्रतिदिनम् । अस्माकं यज्ञमायन्तु=आगच्छन्तु । नः वृधे च असन् अस्माकं वृद्धयेऽभ्युदयाय च भवन्तु । क्रतुः संकल्पः । इह क्रतुपदं लक्षणया क्रतुमतः पुरुषान् लक्षयति । नितरां दृढसंकल्पवत्त्वबोधनं प्रयोजनम् । वृधे=वर्धतेर्भावे क्विपि स्त्रियां चतुर्थी । विभक्तौ रूपम् । अदब्धासः, अपरीतासः='आज्जसेरसुक्, इत्यनेन जसोऽसुक् (पाणि० ७.१.५०) । उद्भित्पदमिह यौगिकरूढम् ।

निषसाद धृतव्रतो वरुणः पस्त्यास्वा ।
साम्राज्याय सुक्रतुः ॥ ऋ० १।२५।१०

देवता=वरुणः । ऋषिः=आजीगर्तिः शुनःशेपः । छन्दः=गायत्री ।

धृतव्रतः=धृतं प्रजापालनव्रतं येन तथाविधः । सुक्रतुः=शोभनसंकल्पः शोभनकर्मा वा । क्रतुपदमिह संकल्पार्थकं कर्मार्थकं वा । यत्क्रतुर्भवति तत् कर्म कुरुते इति बृहदारण्यकोपनिषदि (४.४.५) । यज्ञोऽपिक्रतुरुच्यते । यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः । इत्यमरः । वरुण=प्रजाभिः कृतवरण इत्यर्थ

साम्राज्याय=साम्राज्यस्य रक्षार्थम् । पस्त्यासु आ निषसाद=प्रजासु सिंहासनमधि चक्रे अधिकरोतिवा । वरुणपदमिह यौगिकम् । वृणोतेः । कृवृदारिभ्य उनन् (उणा. ३. ५३) व्रियते प्रजाभिर्वृणोति वा स्वगुणैर्जनानां हृदयानि । सम्राजो भावः साम्राज्यम् । सम्राट्तु-येनेष्टं राजसूयेन मण्डलस्येश्वरश्च यः । शास्ति यश्चाज्ञया राज्ञः स सम्राट् इत्यमरः । साम्राज्यादिपदान्तरसान्निध्यादिह वरुणपदं नृपार्थकम् । वरुणपदमिह यौगिकं न तु 'अपां मध्ये०' इति मन्त्रे देवतार्थकपदवत् रूढम् । एवं वरुणपदं क्वचिद् यौगिकं क्वचिच्च रूढमिति यौगिकरूढम् । यथा वा—

बलविज्ञायः स्थविरः प्रवीरः,
सहस्वान् वाजी सहमान उग्रः ।
अभि वीरो अभि सत्वा सहोजा,
जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥
ऋ० १०।१०३।५

इह वाजीति पदम् इन्द्रस्य विशेषणम् । वाज पदं वेगबलान्नपक्षस्वनाद्यर्थकम् । "......वाजो निः स्वनपक्षयोः । वेगे पुमानथ क्लीबे घृतयज्ञान्नवारिषु" इति मेदिनी । वाजो वेगो बलं वाऽस्यास्तीति व्युत्पत्या पदमिदं यौगिकम्—

उद्धर्षय मघवन्नायुधानि,
उत्सत्वनां मामकानां मनांसि ।
उद् वृत्रहन् वाजिनां वाजिनानि,
उद्रथानां जयतां यन्तु घोषाः ॥
ऋ० १०।१०३।१० ।

देवता—इन्द्रः ऋषिः-ऐन्द्रोऽप्रतिरथः । छन्दः त्रिष्टुप् । इह बाजिपदमश्वार्थे रूढम् । तेन यौगिकरूढम् ।

एवम् "जारः कनीनां पति र्जनीनाम् ॥ ऋ०-१।६६।४ अत्र जार पदं जारणकर्त्रर्थे यौगिकम् । "जार आ भगम्० ऋ. १०।११।६ ।" जारपदमत्र पारदारिकार्थे रूढम् । सोऽग्निरेव कन्यानां कन्याभावस्य=कौमार्यस्य जरयिता वर्तते । विवाहाग्नौ लाजादिद्रव्येण होमे तासां कौमार्यं निवर्तते । स एव जनीनां कृतविवाहानां जायानां पतिः=भर्ता च । इति श्री सायणः । पतिः पालनात् । पातेर्डतिः । उणा (४६७) 'जार आभगम्' ऋ. १०।११।६ । जार इवभगम् । आदित्योऽत्र जार उच्यते, रात्रेर्जरयिता । तथापि निगमो भवति 'स्वसुर्जारः शृणोतु नः" ऋ. ६।५५।५ । इति । उषसमस्य स्वसारमाह । अपित्वयं मनुष्यजार एवाभिप्रेतः । स्यात् ।" इति निरुक्ते श्रीयास्कः ३ अ०।३ पा०।१६ ख. । एवम्—

शं नो अज एकपाद् देवो अस्तु,
शं नोऽहिर्बुध्न्यः शं समुद्रः ।
शं नो अपां नपात् पेरुरस्तु,
शं नः पृश्निर्भवतु देवगोपाः ॥
ऋ० ७।३५।१३

इह रूढे बलाद् अजपदस्य छागाख्यः पशुविशेष इति, एकपाद् इति पदस्य एकचरणवान् कश्चित्=खञ्ज इतिरूपोऽर्थश्च पाठकचेतसि प्रथमं पदं कुरुते, किन्तु प्रकरणेऽनुपपद्यमानत्वात् सविध एव देव इति विशेषणपदसत्त्वाच्च अजपदस्य अजनः=सततगतिमान् तमसामधिक्षेप्ता, अजन्मा अज्ञातजन्मा वेति, एकपात्पदस्य च एकः पाति पालयति विश्वम्, एकः पिवति भौमं जलं स्वरश्मिभिरिति, एकः पादोऽस्येतिरूपो वा यौगिकोऽर्थः स्वात्मानमुपस्थापयति । सायणभाष्ये तु अत्रत्यानां सर्वेषां कर्तृपदानाम् देवताविशेषः" इत्यभिधाय व्याख्या विहिता । एवमेतानि पदानीह यौगिकरूढानि । सूर्यस्य एकपात्त्वम्-एकं पादं नोत्खिदति सलिलाद्धंस उच्चरन्नित्यादि (अथ०११।४।२१) मन्त्रेऽपि वर्णितम् । अपि च—

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् आ राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् । दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायताम् । निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्, योगक्षेमो नः कल्पताम् । (यजु० २२।१२ ।

हे ब्रह्मन्, अस्माकं राष्ट्रे ब्राह्मणः=ब्रह्म वेदम् अधीते वेद वा, तथाविधो जनः । ब्रह्मवर्चसी आजायताम=ब्राह्मतेजःसंपन्नो भूयात् । तदुक्तम्-धिग्बलं क्षत्रियबलं ब्रह्मतेजः परं बलम् । राजन्यः क्षत्रियः । शूरः=पराक्रमी । इषव्यः=शरप्रयोगे साधुः । अतिव्याधी=रिपूणामतिशयेन वेद्धा; महारथश्च आजायताम् । नः धेनुर्दोग्ध्री = प्रचुरपयो दानशीला । सप्तिः आशुः=अश्वः शीघ्रगामी । योषा पुरन्धिः=नारी च पुरं=परिवारं रूपादिगुणसंपन्नं वपुर्वा दधातीति तादृशी आजायताम् । नो राष्ट्रे रथेष्ठाः=रथारूढः सैनिकः । जिष्णुः=जयनशीलः स्यात् । किञ्चास्य नो यजमानस्य युवा वीरः सभेयो जायताम्=तरुणस्तनयः सभासु प्रभाववान् तत्र साधुर्वा भूयात् । स बाल्य एव न म्रियेत वार्धकेऽपि युवेव समर्थश्च स्यात् । निकामे निकामे नः पर्जन्यो वर्षतु=मेघो नः कामवर्षी भवेत् । न ओषधयः फलवत्यः पच्यन्ताम्=सस्यसंपदः प्रचुर फलशालिन्यः सन्तु । ओषध्यः फलपाकान्ताः इत्यमरः । मनुश्च १।४६ । नः योगक्षेमश्च कल्पताम् अप्राप्तस्य अभीष्टस्य प्राप्तिर्योगः, प्राप्तस्य परिरक्षणं च क्षेमः । तयो द्वन्द्वसमासः । इहैकवचनं पुंस्त्वं च छान्दसम् । वर्धते वर्धयति प्रजा वेति-ब्रह्म । बृंहेर्नोऽच्च (उण. ५८५) बृहिवृद्धौ इति-धातोर्मनिन्, नुमा निष्पन्नस्य नकारस्याकारश्च । "ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रःप्रजापतिः ।' इति-मेदिनी । ब्रह्म अधीते वेद वेति ब्राह्मणः । तदधीते तद्वेद (पाणि ४-२-५९) इति सूत्रेण अण् प्रत्यये-रूपम् । वेदाध्येतरि वेदविदि वा विवक्षिते यौगिकमपि पदमिदं कालान्तरे ब्राह्मणकुलोत्पन्नपुरुषार्थे निरूढम् । राजन्यः=राज्ञोऽपत्यमित्यर्थे 'राजश्वशुराद्यत्' (पाणि. ४.१.१३७) इति सूत्रस्थ 'राज्ञोजातावेवेति वाच्यम्' इति वार्तिकेन केवलक्षत्रियकुलोत्पन्नस्य राज्ञोऽपत्यार्थे नियन्त्रितोऽयं शब्दस्तेनास्य योगरूढता । तदुक्तम् सि. कौ. टीकायां श्री ज्ञानेन्द्र सरस्वतीमहोदयेन 'एवं च पङ्कजादिवद्योगरूढ इति फलितोऽर्थ इति । राजन्यपदस्याग्निवाचकत्वे तु 'राजेरन्यः (उणा ३८०)इति सूत्रेण राजृदीप्तौ धातोः अन्य प्रत्ययेन सिद्धिः । महांश्चासौ रथः, महान् रथो वा यस्येति व्युत्पत्तिभ्यां लभ्ययोरर्थयोः कारणाद् यौगिकोऽपि महारथशब्दः 'एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च स विज्ञेयो महारथः ।' इति वचनानुसारं तथाविधवीरार्थे निरूढत्वाद् यौगिकरूढः । शूर वीर विक्रान्तौ धातुभ्याम् अच् प्रत्यये शूरो वीरश्च । अथवा अजगतिक्षेपणयोः धातोः अजति=अभ्यमित्र गच्छति क्षिपतिवाऽस्त्राणीत्यर्थे 'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक् (उणा-१७०) रक् प्रत्यये अजेश्च 'अजे व्यंघञपोः (पाणि. २-४-५६) इति सूत्रेण वीभावे वीरः । विशेषेण ईरयति कम्पयति शत्रूनिति वा वीरः । एवं वीरपदं यौगिकमपि क्वचित् पुत्रार्थे रूढम् यथा 'अधा स वीरैः दशभिर्वियूयाः ऋ. ७-१०४-१५ अथवा अवीरामिव मामयं शरारु रभि मन्यते. ॥ ऋ. १०-८६-९ । लोकेऽपि वीर पदं क्वचित्पुत्रार्थेऽन्यत्र भ्रात्रर्थे जिनविशेषार्थे च रूढम् । सभेयः=सभासु भागग्रहणार्ह इत्यर्थे ढश्छन्दसि (पाणि. ४-४-१०६)इति सूत्रेण ढप्रत्यये कृते सिध्यति । तेन यौगिकः । एवम् इषव्य-अति

व्याधी-दोग्ध्री-वोढृ-ग्राशु-जिष्णु प्रभृतिषु पदेषु ग्रवयवशक्त्या स्वकीयार्थसमपर्कत्वमति स्पष्टमेव।

ननु भवतु लोके यौगिकत्वादिनिमित्तं पदानां चतुर्विधत्वम्, येषां तु मीमांसकानाम् ग्रपौरुषेया ग्रत एव च नित्या वेदाः, येषां वा पुनरपरेषाम् वैदिकानाम्–'तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे (ऋ. १०।९०।९ । यजु. ३१।७ । ग्रथर्व. १९।६।१३ । इत्याद्यनुसारं वेदा मानवोत्पत्तेः पूर्वं मेव तस्मात् परमपुरुषादाविर्भूताः इत्यभिमतं तेषां मते वेदेषु व्यवहारमूलिकाया रूढेः कथं संभवः, व्यवहारस्य वेदेभ्योऽर्वाचीनत्वादिति निरूपयति—

मीमांसामांसलप्रज्ञा जैमिन्याद्या विपश्चितः ।
ग्रपौरुषेयतां तावद् वेदानां प्रत्यपादयन् ॥१०१॥

वैदिका ये च सर्गादौ लोकानुग्रहकाम्यया ।
मन्यन्ते तान् समुत्पन्नांस्तस्मात् परमपूरुषात् ॥१०२

उभयोरपि शब्दानां चतुष्ट्वं पूर्ववर्णितम् ।
कथं नामोपपद्येत, तत्र रूढेरसंभवात् ॥१०३॥

इति चेद् युक्तमुक्तं हि विमृश्य भवता न्विदम् ।
मनीषिणामति प्राचां चेदमेव मनीषितम् ॥१०४॥

यतः सर्वेषु वेदेषु शब्दाः सर्वेऽपि यौगिकाः ।
रूढेः प्रयोगतन्त्रत्वाद् बहूनां बहुशश्चिरम् ॥१०५॥

पित्रादिकृतसंकेताद् व्यवहाराच्च तादृशात् ।
प्रवर्तते पदार्थेषु रूढिर्योगापहारिणी ॥१०६॥

नित्ये सर्गादिजे वाऽपि वेदे रूढिः कथं भवेत् ।
मानवव्यवहारस्य तदनन्तरसंभवात् ? ॥१०७॥

ग्रनित्यस्येतिहासस्य भूगोलस्याऽपि वर्णनम् ।
न चास्ति तत्र नामापि विशिष्टव्यक्तिवाचकम् ॥१०८

ये तु विष्णुवसिष्ठाऽत्रिदधीचिच्यवनादयः ।
तथा सरस्वतीगंगा विपाशायमुनादयः ॥१०९॥

देवर्षिनदीवाचिशब्दा मन्त्रेष्वनेकशः ।
दृश्यन्ते यौगिकास्तेऽपि तद्गुणातिशयार्थकाः ॥११०

शब्दान् वेदेभ्य ग्रादाय तद्गुणख्यापनेच्छया ।
पश्चात् संज्ञाः कृता येषां, न तेषां वर्णनं श्रुतौ । १११

तदुक्तं भगवता मनुना—

सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥
मनु. १.२१

यत्तु—

इदं विष्णुर्वि चक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे ॥ ऋ. १।१२।१७

द्यौर्मे पिता जनिता नाभिरत्र,
बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयो श्चम्वोर्योनिरन्त-
रत्रा पिता दुहितुर्गर्भमाधात् ॥
ऋ. १।१६४।१३ ।

इन्द्रो दधीचो ग्रस्थभि वृत्राण्यप्रतिष्कुतः ।
जघान नवतीर्नव ॥ ऋ. १।८४।१३ ।

उप प्रेत कुशिकाश्चेतयध्व-
मश्वं राये प्रमुञ्चता सुदासः ।
राजा वृत्रं जङ्घनत् प्रागपाग् उदग्,
ग्रथा यजाते वर ग्रा पृथिव्याः ॥
ऋ. ३।५३।११

मन्त्रेष्वेषु पौराणिकाख्यानानां प्राचीननृपतीनां यज्ञादे दीनानाम् इतिहासस्य च संकेतो न केनाऽप्यपलपितुं शक्य इत्युच्यते, तत्राह—

यद् विष्णुर्वामनो भूत्वा चक्राम भुवनत्रयम् ।
बलि मूर्ध्नि पदं धृत्वा पाताले प्राक्षिपच्च तत् ॥११२

यद् दधीचोऽस्थभि वृत्रासुरमिन्द्रो जघान च ।
निजां दुहितरं यच्च प्रजापतिरधर्षयत् ॥११३॥

यत् सुदासः क्षितीशस्योत्सृष्टुं यज्ञाय तद् ययुम् ।
वर्णितं कुशिकाख्यानामृत्विजां च प्रबोधनम् ॥११४॥

एतदाद्यखिलं वेदरहस्याज्ञानजृम्भितम् ।
सत्यार्थविद्भिराचार्यै रिदं प्रागेव दर्शितम् ॥११५॥

तथाहि—

बालसूर्यो भुवः पृष्ठादन्तरिक्षं ततो दिवं ।
क्रामन् पादै र्बलिध्वान्तं प्रापयत्यधरं जगत् ॥११६॥

सूर्यः पिताऽन्तरिक्षंच योनि, र्भू र्दुहिता तथा ।
दूरे विनिहिता यस्माद्, वृष्टिस्तद् गर्भधारणम् ॥११७

द्युलोकेन सम्बन्धात् सूर्यो द्यौरित्येतन्मन्त्रव्याख्यायां श्री सायणः । अत्र तात्स्थ्यलक्षणा मञ्चाः क्रोशन्तीतिवत् । श्री सायणोऽपि मन्त्रस्यास्य व्याख्यायां यौगिकार्थसरणिमेवानुससार । तथा—

इन्द्रो विद्युद् घनो दध्यङ् तदस्थीन्यस्थिरा अपः ।
दुर्भिक्षादेः क्षयो वृष्ट्या वृत्रासुरवधो मतः ॥११८॥

इन्द्रपदं निरुक्ते मध्यस्थानदेवतासु पठितम् । इरां = जलं दृणातीति तद् व्युत्पत्तिश्च प्रदर्शिता । 'इरा तु मदिरावारिभारत्यशनिभूमिषु ।' इति-विश्वः । जलं हि विद्युद्धाराप्रवेशेन स्वघटकयो र्द्वयोस्तत्त्वयोः ओषजनोदजनयो र्विभक्तं भवति । जलं दधद् अञ्चतीति दध्यङ् = मेघः । पदमिदं दधत्पूर्वकस्य अंचतेः क्विन् प्रत्यये, दधतो दधिभावे च पृषोदरादित्वात् साधु । प्रत्यक्तमस्मिन् ध्यानम् इति यास्कः। मेघे हि वृष्टिकामानां जनानां ध्यानं प्रत्यक्तं भवति । अनवस्थानाद् अस्थिरा आप एव तस्यास्थीनि । तस्य जलस्य कदाचित्करकाकारग्रहणाद् अस्थित्वं सुव्यक्तं भवति धवलत्वकठिनत्वसामान्यात् । मेघजलानामस्थिरत्वं मन्त्रान्तरेऽप्युक्तम्—

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ॥　　　　ऋ. १।३२।१० ।

अस्थावराणां काष्ठाः कास्थाः तासामिति, निरुक्ते २।५।१६ वृत्रो वृणोते र्वा वर्तते र्वा वर्धतेर्वा । आवृण्वन्ति लोकमनावृष्टिजन्यानि विविधानि कष्टानि । किं च मन्त्रेऽस्मिन्नस्थिपदस्य स्थानेऽस्थपदं दृश्यते । वृत्रपदमत्र नपुंसकलिंगकम् । तस्य संख्या च नवतीर्नवोक्ता । तेनास्य व्यक्तिविशेषवाचकत्वं न संभवति । अपि च—

सुदासो नृपतेरश्वमेधस्य नाऽत्र वर्णनम् ।
कोऽपि परन्तपो यज्वा सुदाः शोभनदानवान् ॥११९

ये गोतमभरद्वाजविश्वामित्रपुरोगमाः ।
प्रसिद्धा ऋषयः सन्ति सप्तलोकपुराणयोः ॥१२०॥

देहे सप्तेन्द्रियत्वेन यजुर्वेदे तु वर्णिताः ।
तथा शतपथे तेषां यौगिकत्वं निरूपितम् ॥१२१॥

तथाहि—

सप्त ऋषयः प्रति हिताः शरीरे,
सप्त रक्षन्ति सदमप्रमादम् ।
सप्तापः स्वपतो लोकमीयु
स्तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ ॥
　　　　यजु. ३४।५५

अयमेव विषयो बृहदारण्यकोपनिषदि प्रकारान्तरेणोक्तः—

अर्वाग् बिलश्चमस ऊर्ध्वबुध्न्य-
स्तस्मिन्यशो निहितं विश्वरूपम् ।
तस्य ऽऽसत ऋषयः सप्त तीरे
वागष्टमी ब्रह्मणा संविदाना ॥

(क्रमशः)

वसन्तं लब्ध्वाऽमुं............,

शुकदेवदासः शास्त्री नव्यव्याकरणाचार्य, एम०ए० प्रथम वर्ष (दर्शन)

व्यतीतं तच्छीतं शशशशशशेतिस्वनकरम्,
प्रभातोत्थाने नोऽनुभवति तनुस्तीक्ष्णमनिलम् ।
तुषारापातोऽसौ पथगमनरोधः प्रतिमुखः,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥१॥

रविर्धत्ते शीघ्रं प्रखरतरदीप्तिं समुदयन्,
हिमस्यांशं नाशं नयति च गृह्णन्नुत्तरदिशम् ।
निरभ्राकाशे च भ्रमति दधदेकाधिपतिताम्,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥२॥

समाधत्ते वातस्त्रिविधगुणतां लोकरुचिराम्,
श्रमं हृत्वा शैत्यादभि भरति गन्धेन मुदिताम् ।
अपि स्वीयान्मान्द्यान्नुदति हृदि काञ्चिन्मधुरिमाम्,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥३॥

तरुर्जीर्णं पत्रं त्यजति गतकालं मतमिव,
नवान्युद्भाव्यन्ते किसलयमतानि प्रतिभया ।
प्रसर्यन्ते तावत् कुसुमयशसां गन्धनिवहाः,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥४॥

प्रकृष्यन्ते लोका उपवनवने कोकिलरवैः,
कृषिक्षेत्रे रम्ये परिलसति शस्यञ्च विविधम्।
निसर्गः कल्याणं विरचयति नेत्रोत्सवमहो!
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥५॥

धरण्याः प्रत्यंगं स्फुरति नवशोभात्रिलसितम्,
तरङ्गिण्यां नूत्नः प्रवहति रसो नाडिषु यथा ।
शशीसूर्यौ नेत्रे खलु च पिबतो निर्भरमिदम्,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥६॥

फलं लब्धुं स्वीयं यतति नितरां छात्रकृषकम्,
प्रतीक्ष्ये सम्प्राप्ते भवति किमिवाऽकल्पितसुखम् ।
नवं वर्षं चायव्ययमपि नवं भोजननवम्,
वसन्तं लब्ध्वाऽमुं भवति मुदितं विश्वमखिलम् ॥७॥

वसन्तोऽयम्, वसन्तोऽयम् !

विद्याभूषण: श्रीगणेशराम शर्मा, डूंगरपुरम् (राज०)

अये, भो:! दृश्यताम्! वसुधातले व्याप्तो वसन्तोऽयम्!
नवीनां मोहिनीं मधुमाधुरीं तेने वसन्तोऽयम् !! १॥

प्रसन्ना भान्ति दिग्देशा, नभो नीलं च सुस्फीतम्;
चकासच्चारुवासन्ती प्रभापूर्णो दिगन्तोऽयम् ! २॥

वनीनां प्रान्तरेष्वथ शाद्वलेषूद्यानवाटीषु;
द्रुमाणां पत्रपुष्पैर्मञ्जरीमाधुर्यनन्तोऽयम् ! ३॥

विधत्ते सर्वलक्षणसुन्दरीं नवयौवनां सृष्टिम्;
किरत्यानन्दलीलाह्लादमुत्फुल्लो वसन्तोऽयम् ! ४॥

पलाशा: पूरिताशाश्चित्रभास्वद्वयशोभाढ्या:;
स्फुटं विज्ञापयन्त्याविर्बभौ सर्वर्तुकान्तोऽयम् ! ५॥

समन्तात् पुष्पपल्लववैभवै: शृङ्गारिता भूमि:;
तनोति स्वागताचारांश्च ब्रूते प्राणकान्तोऽयम् ! ६॥

प्रफुल्लैश्चित्रवर्णोद्भासुरैस्तै: किंशुकैरेतै:;
स्फुटं जोधुष्यते—'लोके वसन्तोऽयम्, वसन्तोऽयम् ! ७॥

कलं कूजन्त्यमी पुंस्कोकिला कर्णेषु पीयूषम्;
विहङ्गानां रुतैर्ज्ञातं 'हिमर्तोर्मञ्जुलान्तोऽयम् !'८॥

मुखस्पर्शा: सुगन्धा वान्त्यमी मन्दानिला भूमौ;
समाप्याययन्ति जीवनचेतनां सद्य: स्पृशन्तोयम् ! ६॥

वनश्रीर्दिग्वधूदेवाङ्गनानां मण्डलै: साकम्;
नरीनर्तीव, पश्यन् मोदते हृषन् वसन्तोऽयम् ! १०॥

अमन्दामोदमुग्धा मञ्जुला माला मिलिन्दानाम्;
रसोन्मत्ता रणन्त्येता 'वसन्तोऽयम्, वसन्तोऽयम् ! ११॥

मनोभूर्विश्वदिग्विजये प्रयुङ्क्ते मान्मथास्त्रं भो: !
तत: शान्तादिश: सर्वा निशीथश्चन्द्रकान्तोऽयम् ! १२॥

सुधांशो: कौमुदी पीयूषवर्षै: स्नापयत्येनम् !
उपादत्ते च शस्यश्यामला भूर्निर्मलं तोयम् ! १३॥

अजस्रं ताइमा वर्षन्ति वासन्तीलता मुग्धा:,
निकुञ्जे पुष्पसम्पत्सौरभोद्गारान् हसन्त्योऽयम् ! १४।

मधूकै: सर्षपैराख्यायतेऽशोकै: पलाशैर्वा;
वसन्तोऽवातरद्भूमौ मिथो नव्यो ह्युदन्तोऽयम् ! १५॥

स्तुवन्तो यं मनोमोदं लभन्ते काव्यगुम्फेषु;
कवीन्द्रा भारतश्रीमञ्जुलो व्याप्तो वसन्तोऽयम् ॥१६।

न तावद्भावनोद्रेका न रम्यार्था न चातुर्यम्;
प्रशंसेयुर्न यावत् काव्यबन्धं साधु सन्तोऽयम् ! १७॥

—०—

फरवरी मासाङ्कतोऽग्रे

अकारादिध्वनीनां रेखाकृतिस्वरूपम् (लिपिः)

(भाषाविज्ञान–भौतिकविज्ञान–तन्त्रशास्त्रसमन्वितम्)

श्री डा० रामानारायणदासः नव्यव्याकरणाचार्य विद्यावारिधिः (पी-एच. डी.) वाराणसी

वैदिकयुगे लिपेरास्तित्वस्वीकारेऽपरञ्च प्रमाणं श्री दाशरथिरामस्य वैदिकयुगीयत्वरूपं विद्यते ।(न वयं मन्यामहे प्रमाणाभावात् प्रमाणाभासानां च स्वीकारे नैके दोषां आपतन्ति-सम्पादकः) केषाञ्चिद् विदुषां मतानुसारेण दशरथसूनुः श्रीरामो वैदिकयुगे प्रादुर्बभूव[1] ऋग्वेदस्य दशममण्डले श्रीदाशरथिरामस्य चर्चा दृश्यते । अत्र प्रमाणमधस्ताद् अङ्कितम्——

प्र तद् दुःशीमे पृथवाने वेने प्ररामे वोचमसुरे मघवत्सु ।
ये युक्त्वाय पञ्चशतास्मयु यथा विश्राण्येषाम् ।।

प्रमाणरूपेण अत्रोद्धियमाणमन्त्रस्य भाष्यं सायणाचार्यो निम्नोक्तप्रकारेण कृतवान्——

'ये देवाः पञ्चशतानि रथानि युक्त्वाय अश्वैर्युक्त्वाअस्मद्युः अस्मत्कामाः सन्तः यथा यज्ञमार्गिणो गच्छन्ति, तेषामेषां देवानां विश्राणि । देवानां लोके वा विशेषेण श्रावकगुणयुक्तं तत्स्तोत्रं दुःशीमे दुःशीमनाम्नि पृथवाने पृथवानः पृथिः तस्मिन्वेने च असुरे वलवति रामे च एतेषु राजसु प्रवोचं प्रब्रवीमि प्रख्यापयामीत्यर्थः ।'

अत्र भाष्ये दुःशीमेत्यादिव्यक्तिचतुष्टयस्य कृते राजशब्दो विशेषणतया प्रायुज्यत । त्रयो रामाः प्रसिद्धाः सन्ति ते यथा परशुरामः, दाशरथी रामः, बलरामः । एतेषां मध्ये श्री दाशरथीराम एव राजा बभूव नान्यः । तेन अत्र मन्ये तस्यैव ग्रहणं वेदितव्यम् । श्री दाशरथिरामस्य वैदिकत्वेऽकारादिध्वनीनां रेखलिप्यात्मकस्वरूपमपि वैदिककालिकं निश्चप्रचं जातम् । यतो हि अयं भगवान् श्री रामः स्वनामाङ्कितमुद्रां दधाति स्म । तथा चोक्तं वाल्मीकीयरामायणे——

रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्[1]'

किं बहु व्याहारेण । ऋगादिवेदेषु एवं भूतां अपि पदार्था दृष्टिपथं समायान्ति, येषां वैदिककालानन्तरं प्रादुर्भावः, परन्तु तेऽपि वैदिककालिकसत्तावन्तो दृश्यन्ते । तद्यथा——

---

१. ऐसी भी परम्परागत श्रुतियां हैं कि वेदों की रचना के बाद 'रामायण' की रचना हुई और उसकी कलेवर वृद्धि के लिये लगभग ५०० ई० पूर्व तक उसमें अनेक क्षेपक जुड़ते गये । विद्वानों की परम्परा राम और वाल्मीकि को समकालीन मानने के पक्ष में है । **श्री चिन्तामणि विनायक वैद्य का मत है कि ऋग्वेद के दशवें मण्डल, में जिसमें राम का उल्लेख हुआ है, उसका नायक कोई दूसरा नहीं था-दाशरथी राम ही थे ।** श्री वाचस्पति गैरोला 'संस्कृत साहित्य का संक्षिप्त इतिहास पृ. सं. १५९ । अत्र रेखांकित वाक्येन मूलोक्तस्य पुष्टि जायते कस्यचिन्मते तु वेदेषु अनत्यैतिह्यदर्शनं भ्रान्तिधारणा सायणाचार्येणापि भाष्यभूमिकायामन्यत् लिखितं, भाष्येचान्यत्, अतोऽस्मिन् विषये तस्यापि मतिविभ्रम आसीत् ।

१. वाल्मीकीयरामायणम्, सुन्दरकाण्डे सर्गः ३६, श्लोक सं० २

'इमं मे गङ्गे यमुने शुतुद्रि१'

एवं पवित्रतमानां गङ्गादिनदीनां वैदिकयुगत्वे 'प्रतद्दुः शीमे' इति मन्त्रे श्री रामस्योल्लेखात् तस्य वैदिकयुगीयत्वस्वीकारे न काऽपि क्षतिः । स्वनामाङ्कित२मुद्राधारणस्योल्लेखाच्च लिपेरस्तित्वं वैदिककालत एवं स्वीकर्तुमापतति । अत्र विषयेऽपरञ्च प्रमाणमथर्ववेदीय एको मन्त्रो दृष्टिपथं समायाति । स च मन्त्रो यथा--

यद्वो मुद्रं पितरः सोम्यञ्च ते नो सचध्वम्,
स्वयशसो हि भूतम्३

'हे पितरः यत् सोम्यं सोमयागं कर्तुं योग्यं (पवित्रमित्यर्थः) मुद्रं धनं विद्यते, तादृग् धनमस्मभ्यं प्रयच्छत, न तु अन्यायसमर्जितमशुद्धं मुद्रं=मुद्रां=धनं वा' इति पूर्वार्द्धमन्त्रस्य तात्पर्यं विद्यते । अस्मिन्मन्त्रे मुद्रं पदं वैदिकयुगे लिपेरेस्तित्वं प्रमाणी करोति । मुदं हर्षं रातीति विग्रहे मुदकर्मकराधातोः '४आतोऽनुपसर्गेकः' इति कप्रत्ययेऽनुबन्धलोपे 'आतो लोप इटि च' इति राधातुघटकस्य आकारस्य लोपे सति 'मुद्र' इति स्थिते 'छन्दसि सर्वे विधयोविकल्प्यन्ते' इति नियमानुसारेण टाबनुपपत्तौ च मुद्रमितिरूपम्, टाप् प्रत्यये च 'मुद्रा' इतिरूपं संसिद्ध्यते । इदञ्च मुद्रपदं (मुद्रा पदम्) वैदिक युगे कथं प्रमाणमिति ज्ञानात्पूर्वं मुद्रापदस्य रूप्यकार्थे (धनार्थे) अद्यापि वैदिकयुगवत् प्रयोगः क्रियते ।' तत्कथमिति ज्ञानमावश्यकम् विद्यते । मुद्राशब्दस्य अपभ्रष्टः 'मुहर' इति शब्दोऽधुना बहुशः प्रयुज्यते । अपभ्रष्टमुहरशब्दवाच्यार्थरूपे काष्ठादिफलके रेजर्वबैङ्काध्यक्षस्य पदसङ्केतसहितानि नामाक्षराणि अङ्कितानि भवन्ति । कर्गलपत्रनिर्मितं चतुष्कोणात्मकं यद्वा वृत्ताकारात्मकं धातुनिर्मितं यद् रूप्यकं दृश्यते, तद् रेजर्वबैङ्काध्यक्षनामाङ्कितमुद्रया अपि च राष्ट्रचिन्हेन (अशोकस्तम्भेन) चिन्हितं भवति ।' अतो रेजर्वबैङ्काध्यक्षनामाङ्कितमुद्रया रूप्यकमपि (धनं द्रव्यंवा) मुद्रापदेन व्यवह्रियते ।

मुद्राया इयं प्रथा न आधुनिकी । अपि तु अस्याः प्रथायाः परम्परा अविच्छिन्नरूपेण वैदिकयुगादेव प्रचाल्यमाना विद्यते । 'यद्वो मुद्रं पितरः इत्यथर्ववेदीयमन्त्रे धनार्थे (रूप्यकार्थे द्रव्यार्थेवा) मुद्रमिति पदस्य प्रयोगाद् ज्ञायते यत् पुराकाले (वैदिकयुगे) राष्ट्रशासका राजान आदानप्रदानव्यवहारे सौविध्यर्थं स्वनामाक्षराङ्कितमुद्रया अर्धवालिस्तमात्रं यद्वा ततोऽपि न्यूनं चतुष्कोणात्मकं भूर्जादिपत्रं चिन्हितं कृत्वा धनरूपेण व्यवहर्तुमाज्ञापयाञ्चक्रुः । यतो हि यो मया व्यवहारः क्रियते, स केनाऽपि शिक्षितः,येन शिक्षितः, तस्यापि कश्चिद् शिक्षक इति रीत्या सर्वोऽपि व्यवहारः परम्परामूलः । तदित्थं राजनामाक्षराङ्कितमुद्रायाः प्रामाण्यबलेन वैदिकयुगे लिपेरस्तित्वं विश्वासपदवीमाटीकते । वैदिकयुगीयापेक्षया अद्यतनमुद्राया (मुहरपदार्थस्य) स्वरूपे वैलक्षण्यं स्यादिति तु अन्यत् । परन्तु वैदिकयुगेऽपि राजनामाङ्कितमुद्रायाः प्रचलनमासीत् । एवं भाषाविज्ञानदृष्ट्या, आधुनिकैतिह्यविदां मतानुसारेण च लिपिकलायाः प्रादुर्भावं विकासञ्च निरूप्य वैदिकमन्त्रदृशा

---

१. ऋग्वेदः १० मण्डलम् १० सूक्तम् ७५, मन्त्र ५
२. मुद्रा शब्दोऽङ्गुलीयकस्य पर्यायवाची । श्रीमदमरसिंह विरचित अमरकोषे द्वितीय काण्डे मनुष्यवर्गे १०८ तमे श्लोके एतदीयोऽशोद्रष्टव्यः ।
३. १८।३।१६ अथर्ववेदः ।
४. --पाणिनीयंसूत्रम् ।

तत्र विचारः समुपस्थापितः । भौतिकध्वनिशास्त्र दृशा तु अकारादिध्वनेश्चिन्हं विलक्षणं विद्यते ।

वस्तुतस्तु अकारादिध्वनीनां लिप्यात्मकं यद्वा चित्रात्मकं स्वरूपं भौतिकशास्त्रं विना निर्णेतुं दुरूहम् । भाषावैज्ञानिकैर्ध्वनीनां यल्लिप्यात्मकं स्वरूपं प्रतिपाद्यते, तत्तु देशस्य भाषायाश्च भेदानुसारेण विभिन्नरूपत्वाद् अवैज्ञानिकम् । यथा अकारोदेवभाषायां 'अ, अ' इत्येवम्, आंग्लभाषायां रोमनलिप्यां A' इत्येवं रेखया अङ्कीक्रियते । एवञ्च अत्र एकस्यैव अकारस्य भिन्नं लिप्यात्मकं स्वरूपं दृश्यते । भाषाविज्ञानं खलु अकारादिध्वनेः सामान्यं मानवेषु व्यवहृतञ्च रेखयाऽङ्कितं स्वरूपं व्याख्याति, रासायनिको यद्वा भौतिक इव ध्वनेश्चित्राङ्कनकार्यं कर्तुमक्षमम् । वैज्ञानिक वास्तविकञ्च ध्वनेश्चित्रमेतद्भिन्नम् । ध्वनीनां यथार्थं स्वरूपं ज्ञातुं मानवीयबुद्धिहृदयादितत्वस्य, अथच भौतिकशास्त्रस्य ज्ञानमपेक्षितम् ।

सर्वत्र देशे यस्याङ्कनमुच्चारणञ्च समाने, तदेव वैज्ञानिकं भौतिकशास्त्रसमन्वितञ्च ध्वनेश्चिन्हं (लिपिः) चित्रं वा स्वीकर्तव्यम् । यथाऽस्माकं मूर्तिश्चित्रपटे क्रियते, तच्छायाचित्रं दृष्ट्वा उच्यते 'अयं 'देवदत्तः, अयं यज्ञदत्तः, इति । तथैव रीत्या ध्वनेरपि मूर्तिर्ध्वन्यभिलेखनादियन्त्रेषु[1] यान्त्रिकक्रियया निष्पाद्यते, तदेव च ध्वनेर्वास्तविकं रेखयाङ्कितं स्वरूपम् । वक्तुर्मुखान्निःसृता ध्वनयो ध्वन्यभिलेखनयन्त्रस्य परिवृत्तात्मके मण्डलके[2] लिपिरूपेण स्थायिनः[3] क्रियन्ते । ध्वन्यभिलेखनयन्त्रस्थतनुपटसंश्लिष्टा एका सूचिका तीक्ष्णाग्रभागेन [4]मण्डलकं संस्पृशति । ध्वन्यभिलेखनक्षणे मण्डलकं शनैः शनैः परितोभ्राम्यति । यदा ध्वन्यभिलेखनयन्त्रस्थस्य तनुपटस्य पुरःसराणि गायकेन यद्वा वक्त्रा गीतं वाद्यं वा गीयते, समुच्चार्यते च तदा तनुपटोऽपं ध्वन्यनुरूपि परिस्पन्दं कुरुते । ततस्तत्संश्लिष्टसूचिकाऽपि ध्वन्यनुरूपपरिस्पन्दिततनुपटस्पन्दनानुरूपं क्षुभ्यमाणा परिभ्राम्यमाणे मण्डलके ध्वन्यनुरूपमुच्चावचं वक्राकृतिकगर्तं क्रमेण रेखया निर्माति । तदेव ध्वनेर्वास्तविकं रेखयाऽङ्कितं 'स्वरूपम् । 'ध्वनेः आकृतिः, तस्य वक्रता वा कीदृशी ?' इत्येतज्ज्ञानं ध्वनिवक्रताङ्कनयन्त्रेण[1] कर्तुं शक्यते, नान्यथा । उच्चार्यमाणा अकारादिध्वनयो लोहादिफलकानामुपरि पतितेषु रजः कणेषु, सिकतासु, द्रवीभूतेषु जतुषु च स्वानुरूपं चित्रं निर्मान्ति ।

एवमुपर्युक्तं रेखयाङ्कितं ध्वनेः स्वरूपं यथार्थं प्रतिभाति अस्माकं हृदः समुदभूताः विचारा वायौ स्वानुरूपाम् आकृतिं रङ्गञ्च गृह्णाति । एतच्च वैज्ञानिकैः सुष्ठुरूपेण परीक्षितम्[2] । यद्येवमस्ति

---

1. Into the phonograph
2. Record=मण्डलकम्,
3. Recorded
4. The plate of a gramophone

---

१. मिलर ने फोनोडाइक नामक एक यन्त्र बनाया, जिससे ध्वनिवक्रखींचा जाता है । श्री ललित किशोर सिंह ध्वनिविज्ञान पृ. सं. १८५

२. जब हम विचार करते हैं, तब वायु में आकार और रङ्ग उत्पन्न होते हैं । उन विचारों को हमारे स्थूल नेत्र नहीं देख सकते । पेरिस के डाक्टर बेरडुक ने विचारों से वायु में जो चित्र बनते हैं, उनके फोटो लिये हैं । ले० स्वामी ज्ञानाश्रमः, प्रकाशकः डा० बालकृष्ण नागरः "सङ्कल्पसिद्धिः पृ. सं. ४७ विचारों का असर केवल फोटो प्लेट पर ही चित्र बनाना मात्र नहीं है, किन्तु विज्ञान से यह भी ज्ञात हुआ है कि विचार के समय विद्युत उत्पन्न होती है और उसका असर भी मिकनातीसी सुई द्वारा नापा गया है । जहां बिजली होती

तर्हि विचार्यमाणानां चिन्तनविषयीभूतानाम् अकारादिध्वनीनामपि वायोरूपम् रङ्गश्च समुत्पद्येते। किं बहुना यदाऽस्माकं बुद्धिः चिन्तनशीला, तदा मस्तके बुद्धिकेन्द्रे विद्युत् समुत्पद्यते। तया विद्युता च द्रवीभूते जतुजइव बुद्धिकेन्द्रे यद्वा बुद्ध्यवच्छिन्नाकाशे समेषां विचाराणामाकृतिरपि अङ्किता भवति। यद्येवं तर्हि अकारादिध्वनीनां विषयेऽपि सा क्रिया भवति।

अकारादिध्वन्यनुरूपा आकृतिः बुद्धिकेन्द्रे ध्वन्यभिलेखनयन्त्र इव अवश्यमेव विलिख्यते। एतच्च तथ्यम् अस्माकं तन्त्रशास्त्रमपि पोषयति। मूलाधाराद् आब्रह्मविलं विलसन्ती विसतन्तुतनीयसी विद्युत् पुञ्जपिञ्जरा विद्यते१। विवक्षायां सत्यां तया विद्युता द्रवीभूता अमृतधारा सौषुम्णाध्वना यदा शिरसि निपतति, तदा सा अमृतधारा एव ध्वन्यनुरूपां लिपिमयीम् आकृतिं दधाति। ध्वन्यनुरूपां ताञ्च लिपिम् ऋषयो ज्ञानचक्षुषा दृष्टवन्तः। ऋषीणामतीन्द्रियं यज्ज्ञानम्, तदस्माकं प्रत्यक्षमिव। तच्च ज्ञानं किमपि प्रमाणं प्रबाधितुं न शक्नोति। कण्ठताल्वादिस्थानेषु अकारादिध्वन्यनुरूपा रेखाकृतयो विद्यन्ते। ताश्च वर्णानां रेखाकृतयोऽमृतधारया निर्मिताः। तात्पर्यदीपिकायां कामधेनुतन्त्रे२ च अयं विषयः पुष्कलरूपेण प्रतिपादितः। यथा अकारस्य आकृतिः पञ्चकोणात्मिका, ककारस्य च कुण्डलीत्रयसंयुता। यद्वा ध्वनिविलेखन३यन्त्रे ध्वनयो विलिख्यन्ते, तथैव ताल्वादिस्थानस्य ऊर्ध्वपटले तेषामङ्कनं जायते। मानवकृतानिध्वन्यभिविलेखयन्त्राणि ईश्वरप्रणीत हृदयमस्तिष्कमुखादियन्त्रानुकृतिकानि तत्र निर्मिता लिपिरेव ध्वन्यनुरूपा। साच लिपिः अस्माकं चित्रमिव ध्वनीनामाकृतिं तदनुरूपतया व्यक्ती करोति।

अत्र संक्षेपतः एवं बोद्धव्यम्। मुखान्निः सृता ध्वनयः अन्तःकरणाद् वहिर्देश त्रिविधं रेखयाङ्कितं स्वरूपं निर्मान्ति। तद्यथा—

१ घटपटादयो ध्वनयो यादृशं घटपटादिकं मनसि निधाय प्रोच्चारितास्तादृशं कम्बुग्रीवादिबिशिष्टं घटपटाद्यात्मकं चित्रं वायौ यद्वा काष्ठादिफलकेषु निर्मान्ति। वायौ ध्वनिभिरेतादृशं यच्चित्रं निर्मीयते, तद् अस्माकं चक्षुषा न प्रत्यक्षी क्रियते, तादृशचित्रस्य अतीवसूक्ष्मत्वात्। काष्ठादिफलकेषु

है, वहां आकाश के परमाणुओं में कम्पन होता है। इससे सङ्कल्प द्वारा प्रत्येक मनुष्य आकाश में परमाणुओं की गति को बदल देता है। परमाणुओं की गति पलटने से आकाश में रूप बनते हैं।

अयमंशः 'सङ्कल्पसिद्धिः' इति पूर्वोक्ते ग्रन्थे द्रष्टव्यः।

१. आधारादिषट्कमलदलेषु पातिता द्वादशान्तस्थितचन्द्रमण्डलात्सृता अमृतविन्दवोऽकारादिक्षकारान्तवर्णात्मना परिणताः। उक्तं ह्याचार्येण—

मूलाधारात् स्फुरिततडिदाभा प्रभा सूक्ष्मरूपोद्गच्छन्त्यामस्तकमणुतरा तेजसां भूता।
सौषुम्णाध्वचरणनिपुणा सविन्नानुविद्धाध्याता सद्योऽमृतमथ रवः स्नावयेत् सार्धसोमात्।
शिरसि निपतिता या बिन्दुधारा सुधायाः भवति लिपिमयी सा पाभिरङ्ग मुखाद्यम्॥

तात्पर्यदीपिका

२. श्रृणुतत्वमकारस्य अतिगोप्यं वरानने।
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा॥

कामधेनुतन्त्रम्।

3. In to the gramophone

च घटपटादिध्वनिभिस्तत्तदाकारं यच्चित्रं निर्मीयते, तत्तु चक्षुरिन्द्रियविषयार्हम् । परन्तु साधनद्वारा शब्दं तन्निष्ठां शक्तिञ्च साधुतया ये समुपासितवन्तः, तेषामेव घटपटादिध्वनिषु तादृशी शक्तिर्विद्यते, नान्येषाम् । एतादृशीशक्तिः आंशिकरूपेण अद्यतनेऽपि काले 'वायसफिगर्ज' इत्याख्यस्य ग्रन्थस्य लेखिकायाः मिस वट्सह्यूजादेः ध्वनिषु दृष्टा१ ।

२ द्वितीयं रेखयाऽङ्कितं स्वरूपं संदेशाङ्कनयन्त्रेषु२ दृश्यते । सन्देशाङ्कनयन्त्रेषु रोमनलिप्यां ध्वनयः अङ्किता भवन्ति । यदा युष्मद् अस्मदाद्यर्थका 'आई, यू' इत्यादयो ध्वनयः समुच्चार्यन्ते, तदा ते ध्वनयः यन्त्रस्य तद्देशं स्वतरङ्गशक्त्या अभिहतं कुर्वन्ति, यत्र ते रोमनलिप्यामङ्किता भवन्ति । 'आई, यू' इत्यादिध्वनितरङ्गशक्त्या अभिहतो यन्त्रस्य स भागः कर्गलपत्रेषु तं ध्वनिं मसिद्वारा अङ्कितं करोति ।

३ ध्वनिविलेखनयन्त्रस्य मण्डलके१ ध्वनयो रेखयाऽङ्कीक्रियन्ते । अस्य व्याख्यानमितः पूर्वं कृतम् अतो नास्त्यस्य व्याख्यावसरः ।

अपरा च ध्वन्यनुरूपा आकृतिः बुद्धिकेन्द्रे ध्वन्यभिलेखनयन्त्र इव विलिख्यते । अस्यापि विवरणं पूर्वं सम्पादितम् ।

एषु रेखयाऽङ्कितेषु स्वरूपेषु ध्वनिविलेखनयन्त्रस्य मण्डलके, बुद्धिकेन्द्रे च अकारादिध्वनेर्यद अङ्कनम् तदेव ध्वन्यनुरूपम् । 'तत्कथं ध्वन्यनुरूपम्, अन्यच्च कथं न स्वीक्रियते ?' इत्येतत्सर्वं पूर्वमेव ध्वनिविलेखनयन्त्राकितस्य अथ च अमृतधारयाऽकितस्य स्वरूपस्य प्रतिपादनावसरे व्याख्यातम् । साधनद्वारा शब्दं तन्निष्ठां शक्तिञ्च सामुपासितवद्भिः प्रोच्चारितैः घटपटादिध्वनिभिः चित्रफलके यद् घटपटादि चित्रम् अङ्कीक्रियते तदपि ध्वन्यनुरूपतां न आवहति । घटपटादि चित्रं दर्शं दर्शं घटस्य चित्रं सुन्दरम्, अयं घटः' इत्येवं विभिन्नस्य वाक्यात्मकध्वनेः स्मरणात्, न तु 'घटः पटः, इति ध्वनिद्वयस्य । ध्वनिविलेखने यन्त्रे तु एकेन ध्वनिचिन्हेन सर्वस्मिन् काले एक एव ध्वनिरभिव्यज्यते ।

इतिशम् !

---

१. 'वायसफिगर्ज' पुस्तक की लेखिका मिस-वट्सह्यूज ने शब्द के विज्ञान का चमत्कार क्रियात्मक रूप से लन्दन के लार्डलिटन शिल्प-सदन में दिखाये थे। वह अपने बनाये सङ्गीत यन्त्र 'इडोफोन' को बिधिपूर्वक बजाती थी, जिससे अनेकों प्रकार के रूप बन जाते थे। एक वार उसने डेजीनामक सुन्दर पुष्प की आकृतिः बनाई और उसकी व्याख्या भी की कि सङ्गीत यन्त्र को किस विधि से बजाने से ऐसा हुआ ।
फ्रांस की एक महिला विद्यार्थी ने कालभैरवाष्टक के स्तोत्र का गान किया । इससे एक भयङ्कर मूर्ति और कुत्ते की रेखायें अङ्कित हो गई ।
ले० पं० श्रीराम शर्मा आचार्य, डा० गौतमलाल चमन 'तन्त्र महाविज्ञान पृष्ठ सं० ४५६।

2. In to the telly printer

1- Into the record of the Phonograph, or Taperecord

राजगोपाल–मंजरी

काव्यतीर्थ ज. व्यं. पल्लेवार एम. ए. एल. एल. बी. उपाख्य: जयेश पुसद (महाराष्ट्र)

प्रथमो गुच्छः—नमनम्

आचार्य राजगोपालं - गोपालराजमेवहि
कृत्स्नजनहृदानंदं नमामि चक्रवर्तिनम् ।।१।।
शीर्षं यस्यास्ति सुविलसितं शुभ्रकेशावशेषैः
स्कन्धाजानू परिविलसितं शुभ्रवस्त्रं विशालम्
भाले गन्धं कृशतरतनु सक्तकृष्णोपनेत्रम्
तं राजानं नृवरकुलजं चक्रवर्तिं नमामि ।।२।।

द्वितीयो गुच्छः—वंशः

चक्रवर्ति अय्यंगारः सनातनमतप्रियः
आसीत्तस्य पिता पूज्यः वैष्णवधर्मपालकः ।।३।।
असामान्यगुणैः श्रेष्ठः सामान्यकुलज्यपोऽसौ
वर्णधर्मे दृढा श्रद्धा आदर्शगृहमार्मिकः ।।४।।

युग्मकम्

सालेम मंडलाधीने अय्यंगारेन भूषिते
भोरापल्लीलघुग्रामे पवित्रे स्वस्वनिकेतने ।।५।।
आचार्यराजगोपाल–रूपेण खलु भारते
ब्राह्मणस्य कुले जातः चक्रवर्ती नृपो ननु ।।६।।
धर्मपरायणापत्नी अवमेल्मन्गम्मला
जननी पंचबालानां गृहलक्ष्मीस्तु मंगला ।।७।।
तस्य नमागिरी नाम्ना ज्येष्ठ कन्यास्ति सोज्वला
यां ह्यपालयत्राजाजी निःसीममातृमायया ।।८।।

तृतीयोगुच्छः—संस्काराः

राजोचितैः गुणैर्युक्तः शैशवे लालितो गृहे
क्रमशः वर्धिता बुद्धिः शुक्लचन्द्रकलायथा ।।९।।

युग्मकम्

महाविद्यालये तेन बेंगलोरपुरे स्थिते
'सेन्ट्रल' इति विख्याते मद्रास पत्तने तथा ।।१०।।
महाविद्यालये चापि कृत्वाध्ययनमूर्जसा
व्यवसायं विधिज्ञस्य प्रविवेश नवोजसा ।।११।।

चतुर्थोगुच्छः—व्यक्तिदर्शनम्

वयसा वर्धितश्चापि युवाभवद्धि चेतसा
श्री चक्रवर्तिराजाजी वृत्तिना सात्त्विको सदा।।१२।।
बहुधा पुरुषाः लोके प्रकटं प्रियवादिनः
विरलाः पुरुषाः लोके प्रखरसत्यवादिनः ।।१३।।
प्रियान लोकप्रियताहि तस्य-तत्वप्रियोऽस्ति प्रखरःप्रकामम्
देशाभिमानी मतिमानतीव-सेवासुसाध्यान च मन्यते वै।१४।।
महतां जीवने स्वप्नः सत्येन जीवनायते
स्वप्नासत्येन किञ्चिन्न स्वप्नायते तु जीवनम् ।।१५।।
राजसवृत्तिभूतेन राजयज्जनमानसे
सः राजाजीपदे नीतः 'राजा' राजा' इति ब्रुवन् ।।१६।।
वाचा यदुक्तममलं विशुद्धबुद्ध्या
भावेन धर्मचरितं खलु सर्वभक्त्या
भेदः सदा विगलितः पटु वाग् प्रयुक्त्या
कार्येषु देहः निहितः खलु सर्वशक्त्या ।।१७।।
वात्सल्यपूर्णहृदयः किल चक्रवर्ती
सुस्नेहभावभरितो भवति प्रकामम्
प्राराधितः प्रतिदिनं जनतान्तरात्मा
विस्फारितं निखिलभारतमानधाम ।।१८।।
विशद्धपक्षैः प्रतिपादितानि ।
निशम्य सर्वाणि मतानि सम्यक्
विरोधिभावं यदि वास्ति तस्य ।
तथापि चेतो न चचाल तस्य ।।१९।।

युग्मकम्

स्वदेशभक्तोऽपि हि विश्वमित्रम्-
पौराणिकोऽसौ हि सुधारकोऽयम्
स्नेहेन तप्तहृदयोऽपि शीतः
विज्ञानवादी हि कलारसज्ञः ।।२०।।
पारंपरीयोऽपि नवप्रवक्ता-
नीतिज्ञऽषोऽपि हि धर्मनिष्ठः
सुसंगतिः किन्न गुणेषु तस्य
भिन्नस्वराणामिव गायकस्य ।।२१।।

विधूतवैराणि　विरोधनानि
विचारवैशिष्ट्य-विवेचनानि
विनोदवैपुल्यविलासनानि-
विन्यस्तवैष्णवविवेचनानि ॥२२॥
धीयो न्यासश्च राजाजी ।
कृत्स्नभारतवासिनाम्
संज्ञानस्य तथा गान्धेः सदा भवतु रक्षकः ॥२३॥
मोहनस्यासीद्राजाजी-संज्ञानस्य सुरक्षकः
तथा विश्वासपात्रोहि सर्वकार्येषु सर्वदा ॥२४॥
धन्योऽसि राजाजी विचारवित्तैः ।
यैश्च समाकृष्यत मोहनोऽपि
इतः स्तुतिः ते किमु न प्रयोज्या ।
यत्गांधिमप्युच्चतरो विभासि ॥२५॥
सुसंस्कृतत्वेन निवेदितं वपुः ।
विचारवित्तेन निवेदितं वयः
विद्याविलासेन निवेदितं वसु ।
मनोहरत्वेन निवेदितं मनः ॥२६॥
नेदं नभो मंडलचन्द्रचक्रं ।
नेदं च तारागणतेजचक्रम्
नासौ मुरारिधृतहस्तचक्रः
एषोऽहि राजाजी धृतनामचक्रः ॥२७॥
ये मानवाः देश विकासकार्यं ।
कर्तुं निकामं सततं यतन्ते
स्वजीवनं चंदनमेव कर्तुं ।
ते वा महान्तो न कथं भवन्ति ॥२८॥

पंचमगुच्छ–जीवनकार्यम

एनीबिझंटस्य हि होमरूले ।
आरंभिता तेन जनस्य सेवा
विशालरूपेण परिस्फुटासा ।
नदी यथा सागरसख्यमेले ॥२९॥
आंग्लीयहस्ते पतितोऽस्तिदेशः ।
आंग्लैस्त्यजेत्भारतभूमखंडम्
इत्येव घोषेण महात्मनावै ।
आन्दोलनं सन्निहितं जनस्य ॥३०॥

क्रमशः

गुरुकुलकांगड़ीविश्वविद्यालयस्य दीक्षान्तमहोत्सवे

भारतस्य प्रधानमन्त्रिपदमलंकुर्वाणायाः श्रीमत्या इन्दिरादेव्याः करकमलयोः

अभिनंदन-पत्रम्

विश्ववन्द्ये प्रधानमन्त्रिमहाभागे !

पुण्योऽयं दिवसः खलु यस्मिन् गिरिराज-हिमालयस्योपत्यकायां परमपावन्या भागीरथ्याः शुभ्रशीतलपयसा धौतचरणायामस्यां तपोभुवि विराजितस्य गुरुकुलकांगड़ी विश्वविद्यालयस्य वयं समेऽपि कुलवासिनः श्रीमत्याः शुभागमनं हृदयेनाभिनन्दामः। भवत्या महनीयव्यक्तित्वानुरूपं स्वागत-सम्भारसमर्जने न क्षमा वयमिति नितरां संकोचमनुभवामः। तथापि भावग्रहणप्रवणया श्रीमत्यास्माकं 'पत्रं पुष्पम्' अङ्गीकृतमिति नूनं कृतज्ञाः स्मः।

अयि दिव्यज्योतिर्मयि !

श्रीमत्यास्तेजस्विनि नेतृत्वे राष्ट्रस्य वीर-सैनिकैर्दुर्दान्तोऽपि रिपुः पराक्रान्तः, क्रूरतमानामाक्रान्तॄणां हस्ताद् बंगलादेशो मोचितः, स्वाधीन-भारतस्य च कोटिकोटिजनमनःसु राष्ट्राभिमानस्य नवद्युतिः प्रद्योतिता। एतेन पूतेन कृत्येन लंका-विजयप्रसंगे रामस्यौदार्यं संस्मरामो वयम्। अत्रभवत्याः सत्यं न्यायं च प्रति परिनिष्ठिता नीतिःसर्वत्र भारतस्य प्रतिष्ठां शिखरमारोपितवती। गरिमान्वितायाः श्रीमत्याः प्रतिभा कर्तृत्वशक्तिश्च राष्ट्रं सर्वतोमुखसमृद्ध्याः स्वात्मनिर्भरतायाश्च नवीनं मार्गं प्रादर्शयत्। चिरान्निद्रिते पद्दलिते चापि वर्गे नूतनाया आशायाः स्फूर्तेश्च संचारः सञ्जातः।

विशिष्टशिक्षादीक्षयोर्यैस्तत्त्वैः श्रीमत्याम् असाधारणकर्तृत्वशक्तिर्विकसिता, तेषु वर्तते नूनमिदमप्येकं यद् भारतस्याध्यात्मिकी संस्कृतिः पाश्चात्यदेशानां च भौतिकविज्ञानविद्येत्युभयमपि समन्वितरूपेण भवन्मनसि पदं निधत्ते। उभय-विधोऽप्यादर्शो भवत्या स्वजीवने चरितार्थतां नीतः। प्रभोरस्या वेदवाण्या उच्चारणस्य यत्सत्यं भवती पात्रतां प्राप्ता—

'कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः।'
'अहं राष्ट्री संगमनी।'
'अहं जनाय समदं कृणोमि।'
'एतावती महिना संबभूव।'

इतः एकसप्ततिवर्षपूर्वं श्री स्वामिश्रद्धानन्दवर्यैः प्रतिष्ठापितोऽयं गुरुकुलविश्वविद्यालयोऽपि भवत्या स्वीकृतान् समन्वयपोषकान् आदर्शान् शिक्षाक्षेत्रे प्रसारयति। आधुनिक-वैज्ञानिकविषयैः साकं प्राच्यभारतीयसंस्कृतेरपि शिक्षणं प्रारम्भत एव गुरुकुलस्य लक्ष्यभूतम्। एतां शिक्षापद्धतिमनुसृत्य बालकानामिव बालिकानामपि शिक्षणे भृशं दत्तावधानोऽयं विश्वविद्यालयो यथास्मिन् हरिद्वारनगरे बालकानां तथैव देहरादून-नगरे बालिकानां महाविद्यालयान् सुव्यवस्थितरूपेण प्रचालयति। उभयत्रापि भारतस्य विभिन्नेभ्यः प्रदेशेभ्यश्छात्रा विविधज्ञानविज्ञानजातं सदाचारं च शिक्षितुमागच्छन्तीति नूनमियं राष्ट्रीयस्तरस्य संस्था विद्यते।

गुरुकुलस्य स्थापनाकाले देशेऽस्मिन् वैदेशिकानां प्रभुताऽवर्तत। परं संस्थेयं देशभक्ते राष्ट्राभिमानस्य च बीजात् प्रादुर्भूता। अत एव ब्रिटिश-

शासकैः स्वयमागत्य पुरत उपहृतमपि प्रभूतवित्त-राशिम् एतत्संचालकास्तिरश्चक्रुः, नैकविधं संकटं काठिन्यं च वहन्तोऽपि स्वाभिमानव्रतं न विजहुः। एतद्व्रतानुरूपमेव गुरुकुलमिदम् आदित एव राष्ट्र-भाषामाध्यमेन ज्ञानविज्ञानानां शिक्षां प्रयच्छति। गुरुकुलस्य विकासो निरन्तरं विशुद्धराष्ट्रियवाता-वरणे भवतीति कृत्वैव महात्मागांधी, दीनबन्धु एंड्रूज, रवीन्द्रनाथ ठाकुर, बाबू राजेन्द्रप्रसाद, जवाहरलाल नेहरू, वल्लभभाई पटेल, मदनमोहन मालवीय, लाला लाजपतराय, राधाकृष्णन् प्रभृ-तीनां राष्ट्रकर्णधाराणां स्नेहाशिषोप्येतेन समा-सादिताः। स्वाधीनतासंग्रामस्य सर्वेष्वेवान्दोलनेषु गुरुकुलेन विशिष्टः सक्रिययोगो दत्तः। श्रीमत्यापि तस्मिन् महति कुले जनिर्लब्धा यद् राष्ट्रनिर्मातॄणां गौरवास्पदं कुलमिति प्रख्यातिं लभते। एवं गुरुकुलमिदं भवत्या यशस्विकुलेन परमं साम्यं भजते। अतएव भवत्कुलजानां भवत्याश्च स्नेहो-ऽप्येतेन लब्धः, स चास्माकम् अमूल्यो निधिः।

शिक्षायाः क्षेत्रे सर्वविधं साम्प्रदायिकं भेद-भावमपाकृत्य विशुद्धसमताया व्यवहारो गुरुकुल-जीवनस्य मूलभूता नीतिः। स्पृश्यत्वास्पृश्यत्वम्, उच्चत्वनीचत्वम्, धनित्वनिर्धनित्वम् इत्यादिप-क्षपातैर्न कदाप्येतस्य कुलस्य वातावरणं विकृतम्।

राष्ट्रस्य गम्भीरसमस्यासु सततं निरतयाप्य-त्रभवत्याऽस्य विश्वविद्यालयस्य नवस्नातकान् निवासिनश्च निजेनाशीर्वादेन कृतार्थयितुं स्वकीयो बहूमूल्यः समयो व्ययीकृत इति सत्यमेव गुरुकुलस्य गौरवं वृद्धिं गतम्। सुखदेयं स्मृतिः सदैवास्माकं हृत्पटलेष्वंकिता स्थास्यति, सदैव चास्मभ्यम् उच्चादर्शाननुसर्तुं प्रेरणां स्फूर्तिं च प्रदास्यति। श्रीमत्या दिव्यज्योतिषा प्रालोकितेन भावाभिभूतेन च हृदयेन समस्ता अपि कुलवासिनो वयं पुनरपि भवतीं हार्देनाभिनन्दनेन सभाजयामः, कामयामहे च भवत्कृते दीर्घायुष्यम् अक्षयां च शक्तिं, येन राष्ट्रमिदं भवदाचरितैर्गुरुभिः क्रियाकलापैः सुचिरं लाभान्वितं भूयादिति।

वयं स्मो,

दिनांक : १३ अप्रैल १९७३ भवद्गुणानुरक्ताः

शुक्रवासरः गुरुकुल कांगड़ी विश्वविद्यालयस्य

कुलवासिनः



सम्पादकीय टिप्पण्यः

गुरुकुल कांगड़ी विश्वविद्यालयस्य दीक्षान्तमहोत्सवे

प्रधानमन्त्रिमहोदयायाः श्रीमत्या इन्दिरादेव्या आगमनं दीक्षान्तभाषणम् च

त्रीसप्तत्युत्तरैकोनविंशतिशततमे ईस्वीये अप्रेल-मासस्य त्रयोदशतारिकायां तदनुसारं वैशाख-मासस्य प्रथमदिने प्रातः दशवादनसमये भारत-वर्षस्य प्रधानमन्त्रित्वमलंकुर्वाणा श्रीमती इन्दिरा देवी गुरुकुलस्य नवस्नातकेभ्यो विविधोपाधि वितीर्य दीक्षान्तभाषणमददात्। तां दर्शं दर्शं मनसि विचार जातं समुत्पन्नं यत्र सा केवलं स्त्रीजनसुलभोचितं सुकुमारं शान्तं कान्तं वपुर्धत्ते प्रत्युत तस्या अन्तस्त-लात् प्रबला अग्नेः स्फुलिंगा अपि परितः परिस्फु-रन्ति। तां च परितः प्रेरकमत्युग्रं प्रभावोत्तेजकं राजनीतिकवातावरणमपि पर्यवारयत् यच्च यत्र कुत्रापि सा गच्छति तया सह तत् वाता-वरणमपि प्रचलति। सत्यं सा दुर्गा चण्डी काली-त्यादि नामभिः स्मर्तुं शक्यते। न सा सामान्या स्त्री। जगदुत्पत्तिस्थितिप्रलयकर्त्रा परमात्मना राजनीतिक्षेत्रे युगपरिवर्तनाय जड़धियामनुदारवृत्ति परायणानां पर्यवरोधस्यापवारणाय दृढोत्साहसंकल्प-वती सा देवी पृथिव्यां सम्प्रेषिता। अन्यैरतर्कितं यथोचितसमयानुरूपं सा पदं धत्ते इति चिन्तं-चिन्तं महदाश्चर्यं भवति। गुरुकुले हरिद्वारे च यत्र यत्र सा पदं धृतवती तस्या आवागमनस्य यो मार्गो निर्धारित आसीत् तस्यैव कायाकल्पः समजायत। अस्य तात्पर्यमेतत् यत् देशे यत्र मार्गादीनां पण्य-वीथीनां ग्रामाणां वा दुर्दशा स्यात्, श्लथनिर्माणं वा जायेत उद्योगादीनां निर्माणसंरम्भे सर्वकार कार्यकर्तॄणामुपेक्षा दृगोचरीभवेत् तत्रैवास्या देव्याः चरणारविन्दरजः पतत्वित्येष प्रयत्नो विधेयः।

गुरुकुल कांगड़ी विश्वविद्यालयस्य दीक्षान्त-पद्धतिः प्रारम्भादेवापूर्वाऽन्यत्राप्रचलिता विलक्षणा च विश्रुता लोके। यज्ञात् प्रारभ्यते सा। प्राक्तन कालात्समायात औपनिषदर्षीणां सत्योपदेश आदेशो वा नवस्नातकेभ्यः संश्राव्यते काश्चन प्रतिज्ञाः कार्यन्ते च। अस्मिन् वारे प्रधानमन्त्रिमहाभागया ऽपि यज्ञे घृताहुतिप्रदानं विहितम्। अस्मिन् गुरुकुले प्रारम्भादेव पाश्चात्यपौरस्त्यसमन्विता शिक्षा-पद्धतिः प्रचलतीति सर्वैः बोध्यम्। श्रीमत्या देव्या ऽपि स्वकीयभाषणे तस्या एव परिपोषणं विहितम्। श्रीमतीमिन्दिरादेवीं विलोक्य सहसा सूक्तिरेषा प्रतिबभौ "महती देवता ह्येषा नररूपेण तिष्ठतीति" परमेतदपि वयं निस्संकोचं ब्रूमो यद् भारते ये भ्रष्टाचारादिदोषाः समुत्पन्नाः देशस्य चारित्र्यभ्रंशः सञ्जातस्तेषामुन्मूलनमस्या देव्या भाग्ये न प्रती-यते। काऽप्यन्या महती देवता समुत्पत्स्यते या देशस्य सत्यं शिवं सुन्दरं रूपं जनिष्यतीति। अन्ते वयं श्रीमत्या इन्दिरादेव्या अभिनन्दनं कुर्मः।

भगवद्दत्तो वेदालंकारः

साहित्य समीक्षा

सविता (सुपर्णाङ्क)

सम्पादक---श्री विश्वदेव ।

प्रकाशक---वेदसंस्थान, बाबू मोहल्ला, ब्यावर रोड, अजमेर ।

पृष्ठ संख्या १३३, प्रस्तुत अंक का मूल्य---३)

